श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकोनपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनपञ्चाशः सर्गः ॥

## मुनिकुमारेभ्यः श्रुत्वा वाल्मीकेः सीतापार्श्व आगमनं तेन तस्यै सान्त्वनाप्रदानं तस्याः स्वाश्रमे समानयनं च

सीतां तु रुदतीं दृष्ट्वा ते तत्र मुनिदारकाः।
प्राद्रवन् यत्र भगवानास्ते वाल्मीकिरुग्रधीः॥ **7.49.1** ॥

अभिवाद्य मुनेः पादौ मुनिपुत्रा महर्षये।
सर्वे निवेदयामासुस्तस्यास्तु रुदितस्वनम्॥ **7.49.2** ॥

अदृष्टपूर्वा भगवन् कस्याप्येषा महात्मनः।
पत्नी श्रीरिव सम्मोहाद् विरौति विकृतानना॥ **7.49.3** ॥

भगवन् साधु पश्येस्त्वं देवतामिव खाच्च्युताम्।
नद्यास्तु तीरे भगवन् वरस्त्री कापि दुःखिता॥ **7.49.4** ॥

दृष्टास्माभिः प्ररुदिता दृढं शोकपरायणा।
अनर्हा दुःखशोकाभ्यामेका दीना अनाथवत्॥ **7.49.5** ॥

न ह्येनां मानुषीं विद्मः सत्क्रियास्याः प्रयुज्यताम्।
आश्रमस्याविदूरे च त्वामियं शरणं गता॥ **7.49.6** ॥

त्रातारमिच्छते साध्वी भगवंस्त्रातुमर्हसि।
तेषां तु वचनं श्रुत्वा बुद्ध्या निश्चित्य धर्मवित्॥ **7.49.7** ॥

तपसा लब्धचक्षुष्मान् प्राद्रवद् यत्र मैथिली।
तं प्रयान्तमभिप्रेत्य शिष्या ह्येनं महामतिम्॥ **7.49.8** ॥

तं तु देशमभिप्रेत्य किञ्चित् पद्भ्यां महामतिः।
अर्घ्यमादाय रुचिरं जाह्नवीतीरमागमत्।
ददर्श राघवस्येष्टां सीतां पत्नीमनाथवत्॥ **7.49.9** ॥

तां सीतां शोकभारार्तां वाल्मीकिर्मुनिपुङ्गवः।
उवाच मधुरां वाणीं ह्लादयन्निव तेजसा॥ **7.49.10** ॥

स्नुषा दशरथस्य त्वं रामस्य महिषी प्रिया।
जनकस्य सुता राज्ञः स्वागतं ते पतिव्रते॥ **7.49.11** ॥

आयान्ती चासि विज्ञाता मया धर्मसमाधिना।
कारणं चैव सर्वं मे हृदयेनोपलक्षितम्॥ **7.49.12** ॥

तव चैव महाभागे विदितं मम तत्त्वतः।
सर्वं च विदितं मह्यं त्रैलोक्ये यद्धि वर्तते॥ **7.49.13** ॥

अपापां वेद्मि सीते ते तपोलब्धेन चक्षुषा।
विस्रब्धा भव वैदेहि साम्प्रतं मयि वर्तसे॥ **7.49.14** ॥

आश्रमस्याविदूरे मे तापस्यस्तपसि स्थिताः।
तास्त्वां वत्से यथा वत्सं पालयिष्यन्ति नित्यशः॥ **7.49.15** ॥

इदमर्घ्यं प्रतीच्छ त्वं विस्रब्धा विगतज्वरा।
यथा स्वगृहमभ्येत्य विषादं चैव मा कृथाः॥ **7.49.16** ॥

श्रुत्वा तु भाषितं सीता मुनेः परममद्भुतम्।
शिरसा वन्द्य चरणौ तथेत्याह कृताञ्जलिः॥ **7.49.17** ॥

तं प्रयान्तं मुनिं सीता प्राञ्जलिः पृष्ठतोऽन्वगात्।
तं दृष्ट्वा मुनिमायान्तं वैदेह्या मुनिपत्नयः।
उपाजग्मुर्मुदा युक्ता वचनं चेदमब्रुवन्॥ **7.49.18**॥

स्वागतं ते मुनिश्रेष्ठ चिरस्यागमनं च ते।
अभिवादयामस्त्वां सर्वा उच्यतां किं च कुर्महे॥ **7.49.19**॥

तासां तद् वचनं श्रुत्वा वाल्मीकिरिदमब्रवीत्।
सीतेयं समनुप्राप्ता पत्नी रामस्य धीमतः॥ **7.49.20**॥

स्नुषा दशरथस्यैषा जनकस्य सुता सती।
अपापा पतिना त्यक्ता परिपाल्या मया सदा॥ **7.49.21**॥

इमां भवत्यः पश्यन्तु स्नेहेन परमेण हि।
गौरवान्मम वाक्याच्च पूज्या वोऽस्तु विशेषतः॥ **7.49.22**॥

मुहुर्मुहुश्च वैदेहीं परिदाय महायशाः।
स्वमाश्रमं शिष्यवृतः पुनरायान्महातपाः॥ **7.49.23**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनपञ्चाशः सर्गः॥